लतायष्टिमधु। इति राजनिर्घण्टः ॥ अस्या गुणाः क्षीतनकशब्दे द्रष्टव्याः ॥ (यष्टिमधु इति भाषाः।)

अतिस्फिरः, त्रि, (स्फायी ओप्यायाया वृद्धौ अति + स्फाय + स्फायितञ्चिवञ्चिशकीत्यादिसूत्रेण रक् पृषोदरादित्वात् आयभागस्य इ अतिवृद्धः) अतिस्फूर्त्तिशाली। तत्पर्य्यायः। स्फेष्ठः २। इति जटाधरः ॥

अतिहसितं, क्ली, (अतिशयेन हसितं हास्यं हस् + भावे क्तः।) अतिशयहास्यं। इति जटाधरः ॥ (ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च। नीचानामपहसितं तथातिहसितञ्च षड्भेदाः ॥ "मधुरस्वरं विहसितं सांसशिरःकम्पनमवहसितं। अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितं" ॥ इति साहित्यदर्पणे ॥)

अतिहासः, पुं, (अतिशयेन हासः हास्यम् अति + हस् + भावे घञ्।) सशब्दहासः। तत्पर्य्यायः। अनुस्यूतः २। इति हेमचन्द्रः ॥

अतीतं, त्रि, (अति + इण् + क्तः) भूतकालः। तत्र तिस्रो घी टी ठी विभक्तयो भवन्ति। यथा भवद्भूतभव्ये त्रिशः क्याद्याः। क्याद्याः क्तयत्तिखत्तिस्त्रः क्रमाद्वर्त्तमानातीतभविष्यत्सु कालेषु स्युः। इति मुग्धबोधव्याकरणं ॥ तस्य लक्षणादि यथा। वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं। लङ्लुङोरतीतत्वं। लिट्क्वसोर्व्वक्तुः परोक्षत्वं अतीतत्वञ्च। लुङोऽतीतत्वं क्रियातिक्रमस्य। कुतश्चिद्वैगुण्यात् क्रियानिष्पत्तिः क्रियातिक्रमः। क्तक्तवत्वोरतीतत्वं। इति सारमञ्जरी ॥

अतीतः, त्रि, (अति इण् कर्त्तरि क्तः।) गतः। भूतः। अतिक्रान्तः। यथा,—
"न नस्यं न्यूनसप्ताब्दे नातीताशीतिवत्सरे"।
इति वैद्यकपरिभाषा ॥ सङ्गीतशास्त्रमते मानप्रभेदः ॥

अतीन्द्रियं, त्रि, (इन्द्रियमतिक्रान्तम् अत्यादीति समासः।) अप्रत्यक्षं। प्रत्यक्षाविषयं। इन्द्रियागोचरं। इन्द्रियाग्राह्यं। इत्यमरः ॥
("योऽसावतीन्द्रियग्राह्यःसूक्ष्मोऽव्यक्तः सनातनः"। इति मनुः।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः" ॥ इति रघुवंशे ॥)

अतीव, व्य, (अत्येव इव अवधारणे प्रादिसमासः, अवष्टतातिशयेऽत्यन्तातिशये च।) अतिशयः। इत्यमरः ॥
("अहं हि कारणं श्रुत्वा वैरस्यातीवमानद" ॥ इति रामायणे ॥)

अतीसारः, पुं, अतिसाररोगः। इति वैद्यकं ॥

अतुलः, पुं, (नास्ति तुला सादृश्यं यस्य सः।) तिलवृक्षः। इति शब्दचन्द्रिका। तुलनारहिते त्रि ॥ ("राक्षसेन्द्रप्रभावेण श्रिया चातुलया तथा" ॥ इति रामायणे ॥)

अतुल्यं, त्रि, (न तुल्यं सदृशं नञ्समासः।) निस्तुल्यं। अनुपमं। असाम्यं। असदृशं। यथा,—
"अतुल्यमहसा साकं मम रामेण विग्रहः"।
इति भट्टिः ॥

अतुष्टिकरं, त्रि, (तुष्टिं सन्तोषं करोति तुष्टि + कृ + कर्त्तरि टच् उपपदसमासः स्त्रियां ङीप् अतुष्टिकरी।) सन्तोषाजनकं। यथा मनुः,—
"अनिर्दशस्य प्रेतान्नं अतुष्टिकरमेव च" ॥
इत्याह्निकतत्वं।

अतृप्तिः, स्त्री, (तृप् + भावे क्तिन् न तृप्तिः सन्तोषः नञ्समासः। बहुव्रीहौ तु तृप्तिरहितः असन्तोषकरः।) तृप्त्यभावः। अपरितुष्टिः। अन्नाभिलाषः। यथा,—
"उष्णातृप्तितमः प्रवेशदहनं कट्वम्लतिक्ता रसा।
वर्णाः पाण्डुविवर्जितः क्वथितता कर्म्माणि पित्तस्यवै"
इति रक्षितः ॥ अतृप्ते त्रि ॥

अतेजः, [स्] क्ली, (न तेजः तेजोविरोधितमः नञ्समासः।) छाया इति राजनिर्घण्टः ॥ तेजोरहिते त्रि ॥

अत्कः, पुं, शरीरावयवः। अङ्गं। इत्युणादिकोषः ॥

अत्कः, त्रि, (अतति सततमनित्यतया विकारं गच्छति अत् + कन् अतति सततं गच्छति अत् + कन्) पथिकः। पान्थः। इत्युणादिकोषः ॥

अत्ट ङ अतिक्रमे। बधे। इति कविकल्पद्रुमः ॥ दन्त्यवर्गाद्योपधः। ङ अतिट्टिषते। इति दुर्गादासः ॥

अत्ता, स्त्री, (अतति सततं स्नेहं संबध्नाति अत् + तक् स्त्रियां टाप्।) माता। ज्येष्ठा भगिनी। इत्यमरटीकायां रमानाथः ॥ अत्ता माताग्रजस्वसा। इति नानार्थकोषः ॥ प्राकृतभाषायां श्वश्रूः। इति साहित्यदर्पणटीका ॥

अत्तिः, स्त्री, (अत्यते सततं कर्म्मणि सम्बध्यतेऽनया, अत् करणे क्तिन् माता च।) नाट्योक्तौ ज्येष्ठा भगिनी। इति शब्दरत्नावली।

अत्तिका, स्त्री, (अत्ति + स्वार्थे कन्) अन्तिका। नाट्योक्तौ ज्येष्ठा भगिनी। इति भरतः द्विरूपकोषश्च।

अत्नुः, पुं, (अतति सततं गच्छति अत् + कर्त्तरि न वायुः सततगन्ता पथिकः।) सूर्य्यः। इत्युणादिकोषः ॥

अत्यः, पुं, (अतति शीघ्रं गच्छति अत् + कर्त्तरि यत्, क्वचिदपवादविषयेऽप्युत्सर्गोऽप्यभिनिविशते इति न्यायात् अन्यथा हलन्तात् ण्यति आत्य इति स्यात् द्रुतगामी अश्वः।) अश्वः। वैदिकशब्दोऽयं ॥

अत्यन्तं, क्ली, (अन्तं सीमामतिक्रान्तम् अत्यादीति समासः।) अतिशयः। यथा। अत्यन्तं कठिनौ तथापि हृदयानन्दाय वक्षोरुहौ। इति नरहरिकविः ॥

अत्यन्तकोपनः, त्रि, (अत्यन्तं कोपनः क्रोधशीलः द्वितीयातत्, कुप् + कर्त्तरि युच्।) अतिशयक्रोधी। तत्पर्य्यायः। चण्डः २। इत्यमरः ॥

अत्यन्तगामी, [न्] त्रि, (अत्यन्तं शीघ्रं गच्छति अत्यन्त + गम् + णिनि उपपदसमासः।) अतिशयगमनशीलः। अतिशीघ्रगमनकर्त्ता। तत्पर्य्यायः। अत्यन्तिकः २। इति हेमचन्द्रः ॥

अत्यन्तः सुकुमारः, पुं, (अत्यन्तः सुकुमारः कर्म्मधारयः।) कङ्गनीवृक्षः। इति राजनिर्घण्टः ॥

अत्यन्तिकः, पुं, (अत्यन्तं गच्छति अत्यन्त + ठन् ठस्येक इति ठस्य इकः अति सातिशयमन्तिकं कर्म्मधारयः, अतिनिकटम्।) अतिशयभ्रमणकर्त्ता। अत्यन्तगामी। इति हेमचन्द्रः ॥

अत्यन्तीनः, त्रि, (अन्तस्यात्ययः अव्ययीभावसमासः। अत्यन्तं गामी द्वितीयातत्पुरुषः। लक्ष्मीं परस्य रीणां त्वमत्यन्तीनत्वमुन्नये इति भट्टिः।) भृशङ्गामी। अतिशयगमनशीलः। इत्यमरः ॥

अत्यम्लं, क्ली, (अत्यन्तः अम्लोरसः फलपत्रादौ यस्य सः।) वृक्षाम्लं। इति राजनिर्घण्टः ॥ तेँतुल इति भाषा ॥

अत्यम्लपर्णी, स्त्री, (अत्यम्लं पर्णं पत्रं यस्याः सा जातित्वात् ङीप्।) लताविशेषः। तत्पर्य्यायः। तीक्ष्णा २ कण्डुरा ३ वल्लिसूरणः ४ करवड़वल्ली ५ वयस्था ६ अरण्यवासिनी ७। अस्य गुणाः। तीक्ष्णाम्लत्वं। शीहशूलविनाशित्वं। वातहारित्वं। अग्निरुचिकारित्वं। गुल्मश्लेष्मरोगापहारित्वञ्च। इति राजनिर्घण्टः ॥

अत्यम्ला, स्त्री, (अत्यन्तः अम्लरसो यस्याः सा स्त्रियां टाप्) वनवीजपूरः। मधुरलेवु। मधुटावा इति ख्याता। इति रत्नमाला ॥

अत्ययः, पुं, (अति + इण् + भावे अच्।) मृत्युः। अतिक्रमः। दण्डः। दोषः। कृच्छ्रं। इत्यमरः ॥
("जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
इति मनुः ॥)

अत्यर्थं, क्ली, (अर्थमतिक्रान्तं अत्यादीति समासः।) अतिशयः। तद्विशिष्टे वाच्यलिङ्गं। इत्यमरः ॥।
("लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया"।
इति रामायणे ॥)

अत्यल्पं, त्रि, (अत्यन्तमल्पं मनाक्।) यत्किञ्चित्। अतिसूक्ष्मं। तत्पर्य्यायः। अल्पिष्ठं २ अल्पीयः ३ कणीयः ४ अणीयः ५। इत्यमरः ॥

अत्याकारः, पुं, (अति आधिक्येन आकारः तिरस्कारः। आ + कृ + भावे घञ्।) अतिशयितः। आकारो देहः कर्म्मधा। वृहद्देहः। अतिशयितः आकारो यस्य सः तद्विशिष्टः।) न्यक्कारः। तिरस्कारः। इति हेमचन्द्रः ॥

अत्याचारं, क्ली, (आचारमतिक्रान्तं अत्यादीति समासः।) विरुद्धाचरणं। आचारमतिक्रम्य इत्यव्ययीभावसमासनिष्पन्नं ॥

अत्याचारः, पुं, (अति अनुचित आचारः कर्म्मधा।) अनुचिताचारः। असङ्गताचरणं। आचारोल्लङ्घनं। अन्यायः ॥ (अति अनुचितः आचार आचरणं यस्य सः अन्यायाचरणकारी।)

अत्याज्यं, त्रि, (त्यक्तुं न शक्यं अति त्यज् + शक्यार्थे ण्यत्, कृत्वाभावः।) त्यागानर्हं। अत्यक्तव्यं। अत्यजनीयं। यथा, यत्तु पतितस्त्रीगमनस्य लघुत्वं प्रायश्चित्तविवेककृद्भिरुक्तं तदत्याज्यापरं। इति प्रायश्चित्ततत्त्वं ॥